**CODE- SAN103**

**SANSKRIT SAHITYAM**

## मम्मटोक्ताः काव्यस्य हेतवः

वाग्देवताः अवतारः मम्मटाचार्येण काव्यप्रकाशे इत्थं काव्यकारणं प्रतिपादितम्-

**शक्तिर्निपुणतालोकशास्त्रकाव्यद्यवेक्षणात्।**

**काव्यज्ञशिक्षयाऽशिक्षयाऽभ्यास इति हेतुस्तदुद्भवे।**

अर्थात्- काव्योद्भवं प्रति यथा शक्तिः कारणं तथैव निपुणता, तथैव काव्यज्ञशिक्षयाभ्यासः इति त्रीण्ये साहित्येन कारणानि भवन्ति। अत्र विचार्यते यत् कारणं तावद् द्विविधम्। एकं कारणं तृणारणिमणिन्यायेन पृथक्-पृथक् कारणं भवति। यथा- फुत्कारविशिष्टतृणजन्यं वह्निं प्रति तृणं फुत्कारविशिष्टं कारणं भवति। तथा च निर्मन्थनं विशिष्टम् अरणिजन्यं वह्निं प्रति निर्मन्थनविशिष्टः अरणिः कारणं भवति। एवञ्च सूर्यकिरणविशिष्टमणिः कारणं भवति, न तथा द्वितीयकारणं भवति। यथा घटं प्रति दण्डस्य, चक्रस्य, चीत्वस्य च सम्मिलिततया कारणता भवति, न तु पृथक्-पृथक्।

अत्रापि तथैव मम्मटोक्तकारिकायाम् हेतुपदेन त्रयः समुदिता एव, न तु व्यस्ता हेतवः इति बोध्यम्। काव्यं कर्तुं विरचयितुञ्च ये जानन्ति तदुपदेशेन निष्पादने पदानां योजने च पौनःपुन्येन प्रवृत्तिरभ्यासः, इति त्रयः समुदिताः काव्यस्योद्भवे, समुल्लासे च हेतुर्नतु व्यस्ताः हेतव इति करिकार्थः। मम्मटमते तु शक्तिपदेन यां विना काव्यं न प्रसरेत्, प्रसृतं वा उपहास्यजनकं स्यात् इति ईप्सितम् अस्ति। तस्मात् कारणात् अत्र नानाशास्त्रानुरोधेन शक्तिः कवित्वबीजरूपः संस्कारविशेषः प्रतिभा च ज्ञातव्या भवन्ति। निपुणता नाम व्युत्पत्तिः। सा च स्वाधीनक्रियाशून्यः स्थावरः। तदितरो जङ्गमः, तदुभयात्मकस्य लोकवृत्तस्य, शास्त्राणाम्- छन्दः, व्याकरणम्, अभिधानम्, कोशः, कलाः, चतुर्वर्गगजतुरङ्गादिलक्षणग्रन्थानाम्। काव्यानाञ्च- महाकविसम्बन्धीनां कारिकाघटकीभूतेन आदि पदेन इतिहासादीनां च विमर्शनाद् भवति। काव्यज्ञः शिक्षया अभ्यासः काव्यम्। काव्यं कर्तुं विरचयितुञ्च ये जानन्ति, तेषां शिक्षाणाम् अभ्यासः इत्यर्थः अवशेषः।

काव्यस्य हेतुपदं काव्योत्पादः प्रयोजकः अवच्छेदकं शक्तिनिपुणताभ्यासः तृतीयं निष्ठं यत् समुदायत्वं तदवच्छिन्नपरम्, एकत्वञ्च तादृशः पदार्थः तावच्छेदकीभूते समुदायत्वे एवान्वेति ईदृशं समुदायत्वम् अन्वितम् एकत्वम् एकवचनार्थः इति न अन्वयभाव इति विशेषतो व्युत्पादितम्